सर्पनिर्म्मोकसदृशौ तौ वृक्षाग्रावलम्बिनौ ।
तथान्यैर्मण्डलैश्चित्रैश्चित्रिता इव भान्ति ते ॥
सर्व्व एव तु विज्ञेयाः सोमाः पञ्चदशच्छदाः ।
क्षीरकन्दलतावन्तः पत्रैर्नानाविधैः स्मृताः ॥
हिमवत्यर्व्वुदे सह्ये महेन्द्रे मलये तथा ।
श्रीपर्व्वते देवगिरौ गिरौ देवसहे तथा ॥
पारिपात्रे च विन्ध्ये च देवसुन्दे ह्रदे तथा ।
उत्तरेण वितस्तायाः प्रवृत्ता ये महीधराः ॥
पञ्च तेषामधो मध्ये सिन्धुनामा महानदः ।
इठवत् प्लवते तत्र चन्द्रमाः सोमसत्तमः ॥
तस्योद्देशेषु वाप्यस्ति मुञ्जवानंशुमानपि ।
काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम् ॥
गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा ।
अत्र सन्त्यपरे चापि सोमाः सोमसमप्रभाः ॥
न तान् पश्यन्त्यधर्म्मिष्ठाः कृतघ्नाश्चापि मानवाः
भेषजद्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा ॥”
इति सुश्रुते चिकित्सितस्थाने एकोनत्रिंशत्तमोऽध्यायः ॥*॥ “सोमनामौषधिराजः पञ्चदशपर्णः स सोम इव हीयते वर्द्धते च ।” इति चरके चिकित्सास्थाने प्रथमेऽध्याये ॥ * ॥*॥) शिवः । दीधितिः । इत्युणादिकोषः । दिव्यौषधिः । सोमलतारसः । इति हेमचन्द्रः ॥ (यथा, मनुः । ३ । २५७ ।
“मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम् ।
अक्षारलवणञ्चैव प्रकृत्या हविरुच्यते ॥”)
अमृतम् । पर्व्वतविशेषः । इति केचित् ॥*॥ चन्द्रस्य विवरणं तथा । स च वायुकोणस्त्रीवैश्यजातिसत्त्वगुणलवणरसमृगशिरोनक्षत्रसमुद्राणामधिपतिः । इति बृहज्जातकादयः ॥ एकहस्तप्रमाणशरीरः । श्वेतवस्त्रपरिधानः । शुक्लवर्णः । दक्षिणहस्तवरदः । गदायुक्तवामहस्तः । दशाश्वः । श्वेतपद्मस्थः । उमाधिदैवतः । जलप्रत्यधिदैवतः । सूर्य्याभिमुखः । यथा,—
“सामुद्रं वैश्यमात्रेयं हस्तमात्रं सिताम्बरम् ।
श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम् ॥
दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदैवतम् ।
जलप्रत्यधिदैवञ्च सूर्य्यास्यमाह्वयेत्तथा ॥”
इति ग्रहयागतत्त्वम् ॥ * ॥
तस्योत्पत्त्यादिर्यथा,—

ऋषय ऊचुः ।

“सोमः पितॄणामधिपः कथं शास्त्रविशारद ।
तद्वंशे के तु राजानो बभूवुः कीर्त्तिवर्द्धनाः ॥

सूत उवाच ।

आदिष्टो ब्रह्मणा पूर्व्वमत्रिः सर्गविधौ पुरा ।
अनुत्तमं नाम तपः सृष्ट्यर्थं तप्तवान् प्रभुः ॥
सदानन्दकरं ब्रह्म जगतः क्लेशनाशनम् ।
ब्रह्मविष्ण्वर्करुद्राणामभ्यन्तरमतीन्द्रियम् ॥
शान्तिकृच्छान्तमनसस्तदन्तर्नयने स्थितम् ।
माहात्म्यात्तपसो विप्राः परमानन्दकारकम् ॥
यस्मादुमापतिः सार्द्धमुमया तमधिष्ठितः ।
तद्दृष्ट्वा अष्टमांशेन तस्मात् सोमोऽभवच्छिशुः ॥
अथ सुस्राव नेत्राभ्यां धाम तच्चाम्बुसम्भवम् ।
दीपयन् विश्वमखिलं ज्योत्स्नया सचराचरम् ॥
तद्दिशो जगृहुर्द्धाम स्त्रीरूपेण सुतेच्छया ।
गर्भो भूत्वोदरे तासामास्थितोऽब्दशतत्रयम् ॥
तास्तमूचुर्व्वयं गर्भमशक्ता धारणे ततः ।
समादायाथ तद्गर्भमेकीकृत्य चतुर्म्मुखः ॥
युवानमकरोद्ब्रह्मा सर्व्वायुधधरं वरम् ।
स्यन्दनेऽथ सहस्राश्वे वेदशक्तिमये प्रभुः ॥
आरोप्य लोकमनयदात्मीयं स पितामहः ।
ततो ब्रह्मर्षिभिः प्रोक्तमस्मत्स्वामी भवत्वयम् ॥
ऋषिभिर्द्देवगन्धर्व्वैरोषधीभिस्तथैव च ।
तुष्टुवुः सोमदैवत्यैर्ब्रह्माद्या मन्त्रसंग्रहैः ॥
स्तूयमानस्य तस्याभूदधिको महसाञ्च यः ।
तेजोवितानादभवद्भुवि दिव्यौषधीगणः ॥
तद्दीप्तिरधिका तस्माद्रात्रौ भवति सर्व्वदा ।
तेनौषधीशः सोमोऽभूत् द्विजेशश्चाभिगद्यते ॥
वेदधामा रसश्चापि यदिदं चन्द्रमण्डलम् ।
क्षीयते वर्द्धते चैव शुक्ले कृष्णे च सर्व्वदा ॥
ततो विंशत्तथा सप्त दक्षः प्राचेतसो ददौ ।
रूपलावण्यसंयुक्तास्तस्मै कन्याः सुवर्च्चसः ॥”
इति मात्स्ये । २३ । १—१५ ॥ * ॥
अपि च ।

महातपा उवाच ।

“ब्रह्मणो मानसः पुत्त्रः अत्रिर्नाम महातपाः ।
तस्य पुत्त्रोऽभवत् सोमो दक्षजामातृतां गतः ॥
सप्तविंशतिर्याः कन्या दाक्षायण्यः प्रकीर्त्तिताः ।
सोमपत्न्योऽपि मान्यास्तास्तासां श्रेष्ठा तु रोहिणी ॥
तामेव रमते सोमः नेतरा इति शुश्रुम ।
इतराः प्रोचुरागत्य चन्द्रस्यासमतां पितुः ॥
दक्षोऽप्यसकृदागत्य तमुवाच स नाकरोत् ।
समतां सोऽपि तं दक्षः शशापान्तर्हितो भव ॥
एवमुक्तः क्षयं सोमो अगमद्दक्षशापतः ॥
देवा मनुष्याः पशवो नष्टे सोमे सवीरुधः ।
क्षीणाभवंस्तदा सर्व्वा ओषध्यश्च विशेषतः ॥
क्षयं गच्छद्भिरत्यर्थमोषधीभिः सुरर्षभाः ।
मूलेषु वीरुधां सोमः स्थित इत्यूचुरातुराः ॥
तेषां चिन्ताभवत्तीव्रा विष्णुञ्च शरणं ययुः ।
भगवानाह तान् सर्व्वान् ब्रूत किं क्रियते मया
ते चाहुर्देव दक्षेण शप्तः सोमो विनाशितः ।
तानुवाच तदा देवो मथ्यतां कलसोदधिः ॥
ओषध्यः सर्व्वतो देवाः प्रक्षिप्याम्बुषु संयतैः ।
एवमुक्त्वा ततो देवान् दध्यौ रुद्रं हरिः स्वयम् ॥
ब्रह्माणञ्च तथा दध्यौ वासुकिं नेत्रकारणात् ।
ते सर्व्वे तत्र सहिता ममन्थुर्वरुणालयम् ॥
तस्मिंस्तु मथिते जातः पुनः सोमो महीपते ।
योऽसौ क्षेत्रज्ञसंज्ञो वै देहेऽस्मिन् पुरुषः परः ॥
स एव सोमो मन्तव्यो देहिनां जीवसंज्ञकः ।
परेच्छया स मूर्त्तिन्तु पृथक् सौम्यां प्रपेदिवान्
तमेव देवमनुजाः षोड़शैमाश्च देवताः ॥
उपजीवन्ति वृक्षाश्च तथैवौषधयः प्रभुम् ॥
रुद्रस्तमेव सकलं दधार शिरसा तदा ।
तदात्मिका भवन्त्यापो विश्वमूर्त्तिरसौ स्मृतः ॥
तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीतिथिं प्रभुः ।
तस्यानुपोषयेद्राजन् तमर्थं प्रतिपादयेत् ॥
स चान्नाहारश्च भवेत् तस्य ज्ञानं प्रयच्छति ।
कान्तिं पुष्टिञ्च राजेन्द्र धनं धान्यञ्च केवलम् ॥”
इति वाराहे सोमोत्पत्तिरहस्यनामाध्यायः॥*॥
तस्य क्षयवृद्धिकारणं यथा,—

ब्रह्मोवाच ।

“राका चानुमती चैव द्विविधा पूर्णिमा मता ।
सिनीवाली कुहूश्चैव अमावास्या द्विधैव तु ॥
अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठिता ।
यस्मात् सोमो वसत्यस्याममावासी ततः स्मृता ॥
पूर्व्वोदितकलाभिन्नपौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चात् स्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोद्गमः ।
युगपत् सोत्तरारागस्तदानुमतिपूर्णिमा ॥
राकां तामनुमन्यन्ते देवताः पितृभिः सह ।
रञ्जनाच्चैव चन्द्रस्य राकेति कवयोऽब्रुवन् ॥
सिनीवाली प्रमाणन्तु क्षीणशेषो निशाकरः ।
अमावास्यां विशत्यर्कं सिनीवाली ततः स्मृता
कुहेति कोकिलेनोक्तो यः कालस्तु समाप्यते ।
तत्कालसंज्ञा त्वेषा वै अमावस्या कुहूः स्मृता ॥
अनुमत्याः सराकायाः सिनीवाल्याः कुहूं विना
एतासां विरलः कालः कुमात्रेति कुहूः स्मृता ॥”
विरलस्थाने हिलवेति च पाठः ।
“कलाः षोड़श सोमस्य शुक्ले वर्द्धयते रविः ।
अमृतेनामृतं कृष्णे पीयते दैवतैः क्रमात् ॥
प्रथमां पिबते वह्निर्द्वितीयां पवनः कलाम् ।
विश्वेदेवास्तृतीयान्तु चतुर्थीन्तु प्रजापतिः ॥
पञ्चमीं वरुणश्चापि षष्ठीं पिबति वासवः ।
सप्तमीमृषयो दिव्या वसवोऽष्टौ तथाष्टमीम् ॥
नवमीं कृष्णपक्षस्य पिबतीन्द्रः कलामपि ।
दशमीं मरुतश्चापि रुद्रा एकादशीं कलाम् ॥
द्वादशीन्तु कलां विष्णुर्धनदश्च त्रयोदशीम् ।
चतुर्द्दशीं पशुपतिः कलां पिबति नित्यशः ॥
ततः पञ्चदशीञ्चैव पिबन्ति पितरः कलाम् ।
कलावशिष्टो निष्पीतः प्रविष्टः सूर्य्यमण्डलम् ॥
अमायां विशते रश्मौ अमावासी ततः स्मृता ॥
पूर्व्वाह्णे विशते चार्कं मध्याह्ने तु वनस्पतिम् ।
अपराह्णे विशत्यप्सु स्वयोनिं वारिसम्भवः ॥
आपः प्रविष्टः सोमश्च शेषया कलयैकया ।
तृणगुल्मलतावृक्षान्निष्पादयति चौषधीः ॥
तमोषधिं स्थितं गावश्चरन्त्यापः पिबन्ति च ।
तदङ्गानुगतं गोभ्यः क्षीरत्वमुपगच्छति ॥
तत् क्षीरममृतं भूत्वा मन्त्रभूतं द्विजातयः ।
स्वाहाकारवषट्कारैर्जुह्वत्याहुतयः क्रमात् ।
हुतमग्निषु देवाय पुनः सोमं विवर्द्धयेत् ॥
एवं संक्षीयते सोमः क्षीणश्चाप्याय्यते पुनः ।
तस्मात् सूर्य्यः शशाङ्कस्य क्षयवृद्धिविधिर्विभुः ॥”
इत्याद्ये देवीपुराणे चन्द्रक्षयवृद्धिनामाध्यायः॥*